# shrIaShTalakShmImantrasiddhividhAnam

# શ્રીઅષ્ટલક્ષ્મીમન્ત્રસિદ્ધિવિધાનમ્

## Document Information

Text title : aShTalakShmImantrasiddhividhAnam

File name : aShTalakShmImantrasiddhividhAnam.itx

Category : devii, lakShmI, devI, mantra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીઅષ્ટલક્ષ્મીમન્ત્રસિદ્ધિવિધાનમ્

આદૌ શ્રીરમાનાથધ્યાનં
શ્રીવત્સવક્ષસં વિષ્ણું ચક્રશઙ્ખસમન્વિતમ્ ।
વામોરુવિલસલ્લક્ષ્મ્યાઽઽલિઙ્ગિતં પીતવાસસમ્ ॥

સુસ્થિરં દક્ષિણં પાદં વામપાદં તુ કુઞ્જિતમ્ ।
દક્ષિણં હસ્તમભયં વામં ચાલિઙ્ગિતશ્રિયમ્ ॥

શિખિપીતામ્બરધરં હેમયજ્ઞોપવીતિનમ્ ।
એવં ધ્યાયેદ્રમાનાથં પશ્ચાત્પૂજાં સમાચરેત્ ॥

ઋષિઃ - છન્દઃ - દેવતા - વિનિયોગઃ
અસ્ય શ્રીઅષ્ટલક્ષ્મીમહામન્ત્રસ્ય - દક્ષપ્રજાપતિઃ ઋષિઃ -
ગાયત્રી છન્દઃ - મહાલક્ષ્મીર્દેવતા - શ્રીં બીજં - હ્રીં શક્તિઃ -
નમઃ કીલકં - શ્રીમહાલક્ષ્મીપ્રસાદેન અષ્ટૈશ્વર્યપ્રાપ્તિદ્વારા
મનોવાક્કાયસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

કરન્યાસઃ
શ્રીં હ્રીં શ્રીં કમલે શ્રીં હ્રીં શ્રીં અઙ્ગુષ્ટાભ્યાં નમઃ ।
શ્રીં હ્રીં શ્રીં કમલાલયે શ્રીં હ્રીં શ્રીં તર્જનીભ્યાં નમ ॥

શ્રીં હ્રીં શ્રીં પ્રસીદ શ્રીં હ્રીં શ્રીં મધ્યમાભ્યાં નમઃ ।
શ્રીં હ્રીં શ્રીં પ્રસીદ શ્રીં હ્રીં શ્રીં અનામિકાભ્યાં નમઃ ।
શ્રીં હ્રીં શ્રીં મહાલક્ષ્મ્યૈ શ્રીં હ્રીં શ્રીં કનિષ્ઠિકાભ્યાં નમઃ ।
શ્રીં હ્રીં શ્રીં નમઃ શ્રીં હ્રીં શ્રીં કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિ ન્યાસઃ
શ્રીં હ્રીં શ્રીં કમલે શ્રીં હ્રીં શ્રીં હૃદયાય નમઃ ।
શ્રીં હ્રીં શ્રીં કમલાલયે શ્રીં હ્રીં શ્રીં શિરસે સ્વાહા ।
શ્રીં હ્રીં શ્રીં પ્રસીદ શ્રીં હ્રીં શ્રીં શિખાયૈ વષટ્ ।

શ્રીં હ્રીં શ્રીં પ્રસીદ શ્રીં હ્રીં શ્રીં કવચાય હુમ્ ।
શ્રીં હ્રીં શ્રીં મહાલક્ષ્મ્યૈ શ્રીં હ્રીં શ્રીં નેત્રત્રયાય વૌષટ્ ।
શ્રીં હ્રીં શ્રીં નમઃ શ્રીં હ્રીં શ્રીં અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ -
વન્દે લક્ષ્મીં વરશશિમયીં શુદ્ધજામ્બૂનદાભાં
તેજોરૂપાં કનકવસનાં સર્વભૂષોજ્જ્વલાઙ્ગીમ્ ।
બીજાપૂરં કનકકલશં હેમપદ્મે દધાનાં
આદ્યાં શક્તિં સકલજનનીં વિષ્ણુવામાઙ્કુસંસ્થામ્ ॥

પૂજા
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
લં પૃથ્વીતત્ત્વાત્મકં ગન્ધં સમર્પયામિ નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
હં આકાશતત્ત્વાત્મકં પુષ્પં સમર્પયામિ નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
યં વાયુતત્ત્વાત્મકં ધૂપમાઘ્રાપયામિ નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
રં વહ્નિતત્ત્વાત્મકં દીપં દર્શયામિ નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
વં અમૃતતત્ત્વાત્મકં નૈવેદ્યં સમર્પયામિ નમઃ ।
ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ મહાલક્ષ્મ્યૈ ૐ -
સં સર્વતત્ત્વાત્મકં સર્વોપચારપૂજાં સમર્પયામિ નમઃ ।
અષ્ટનામાર્ચના
ૐ આદિલક્ષ્મ્યૈ નમઃ । ૐ સન્તાનલક્ષ્મ્યૈ નમઃ ।
ૐ ગજલક્ષ્મ્યૈ નમઃ । ૐ ધનલક્ષ્મ્યૈ નમઃ ।
ૐ ધાન્યલક્ષ્મ્યૈ નમઃ । ૐ વિજયલક્ષ્મ્યૈ નમઃ ।
ૐ વીરલક્ષ્મ્યૈ નમઃ । ૐ ઐશ્વર્યલક્ષ્મ્યૈ નમઃ ।
ષોડશ માતૃકાર્ચના
અં કામાકર્ષિણ્યૈ નમઃ । આં બુદ્ધ્યાકર્ષિણ્યૈ નમઃ ।
ઇં અહઙ્કારાકર્ષિણ્યૈ નમઃ । ઈં શબ્દાકર્ષિણ્યૈ નમઃ ।
ઉં સ્પર્શાકર્ષિણ્યૈ નમઃ । ઊં રૂપાકર્ષિણ્યૈ નમઃ ।

ૠ રસાકર્ષિણ્યૈ નમઃ । ૠૃ ગન્ધાકર્ષિણ્યૈ નમઃ ।
ૡં ચિત્તાકર્ષિણ્યૈ નમઃ । ૡૄ ધૈર્યાકર્ષિણ્યૈ નમઃ ।
એં સ્મૃત્યાકર્ષિણ્યે નમઃ । ઐં નામાકર્ષિણ્યે નમઃ ।
ૐ બીજાકર્ષિણ્યે નમઃ । ઔં આત્માકર્ષિણ્યે નમઃ ।
અં અમૃતાકર્ષિણ્યે નમઃ । અઃ શરીરાકર્ષિણ્યૈ નમઃ ।
કુમ્ભાદિ કુમ્ભગોપ્ત્રી ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવિ ત્વત્પ્રસાદાન્મયિ સ્થિરા ॥

જપપ્રકારમ્
ગુરુ પ્રાર્થના - ૐ નમઃ શ્રીગુરુદેવાય પરમપુરુષાય નમઃ ।
અષ્ટૈશ્વર્યલક્ષ્મી દેવતાઃ ।
વશીકરાય સર્વારિષ્ટવિનાશનાય ત્રૈલોક્યવશાયૈ સ્વાહા ॥

મૂલમન્ત્રમ્ ।
૧ ૐ શ્રીં હ્રીં શ્રીં કમલે કમલાલયે પ્રસીદ પ્રસીદ
  શ્રીં હ્રીં શ્રીં ૐ મહાલક્ષ્મ્યૈ નમઃ ।
૨ ૐ શ્રીં હ્રીં ક્લીં ઐં સૌઃ જગત્પ્રસૂત્યૈ સ્વાહા ।
૩ ૐ શ્રીં હ્રીં ઐં મહાલક્ષ્મ્યૈ કમલધારિણ્યે સિમ્હવાહિન્યૈ સ્વાહા ।
વૈદિકમન્ત્રમ્
મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ન્યૈ ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥

મહાલક્ષ્મિ નમસ્તુભ્યં નમસ્તુભ્યં સુરેશ્વરિ ।
હરિપ્રિયે નમસ્તુભ્યં નમસ્તુભ્યં દયાનિધે ॥

પદ્માસને પદ્મકરે સર્વલોકૈકપૂજિતે ।
સાન્નિધ્યં કુરુ મે ચિત્તે વિષ્ણુવક્ષસ્થલાલયે ॥

ભગવદ્દક્ષિણે પાર્શ્વે ધ્યાયેચ્છ્રિયમવસ્થિતામ્ ।
ઈશ્વરીં સર્વભૂતાનાં જનનીં સર્વદેહિનામ્ ॥

ઇતિ શ્રીઅષ્ટલક્ષ્મીમન્ત્રસિદ્ધિવિધાનં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIaShTalakShmImantrasiddhividhAnam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*